M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 1121

Title: Pratyeka Tattva Viveka Pada Dipika

1121

पंचदशी (तत्वविवेक)

C	Pratyak Tattva Viveka Pada Dipika	Title
		Author
		Editor
		Year, Vols.
SK		Publisher
1121		Remarks

साकारणशरीरंस्यात्प्राज्ञस्तत्राभिमानवान् तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया वियत्पवनतेजोंबुभुवोभूतानिजज्ञिरे सत्वांशैःपंचभिस्तेषां
क्रमाद्धींद्रियपंचकं श्रोत्रत्वक्चक्षुरसनघ्राणाख्यमुपजायते १९ तैरंतःकरणंसर्वैर्वृत्तिभेदेनतद्द्विधा मनोविमर्शरूपंस्याद्बुद्धिःस्यान्निश्च
यात्मिका रजोंशैःपंचभिस्तेषांक्रमात्कर्मेंद्रियाणितु वाक्पाणिपादपायूपस्थाभिधानानिजज्ञिरे २१ तैःसर्वैःसहितैःप्राणोवृत्तिभेदात्स
पंचधा प्राणापानःसमानश्चोदानव्यानौचतेपुनः २२ बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसाधिया शरीरंसप्तदशभिःसूक्ष्मंतल्लिंगमुच्यते प्राज्ञस्त
त्राभिमानेनतैजसत्वंप्रपद्यते हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता २४ समष्टिरीशःसर्वेषांस्वात्मतादात्म्यवेदनात् तदभावात्ततोन्ये
तुकथ्यंतेव्यष्टिसंज्ञया २५ तद्भोगायपुनर्भोग्यभोगायतनजन्मने पंचीकरोतिभगवान्प्रत्येकंवियदादिकं द्विधाविधायचैकैकंचतुर्धाप्रथ
मंपुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंचपंचते २७ तैरंडस्तत्रभुवनभोग्यभोगाश्रयोद्भवः हिरण्यगर्भःस्थूलेस्मिन्देहेवैश्वानरोभवेत्
तैजसाविश्वतांयातादेवतिर्यङ्नरादयः २९ तेपराग्दर्शिनःप्रत्यक्तत्वबोधविवर्जिताः कुर्वतेकर्मभोगायकर्मकर्तुंचभुंजते नद्यांकीटाइ
वावर्तादावर्तांतरमाशुते व्रजंतोजन्मनोजन्मलभंतेनैवनिर्वृतिं ३१ सत्कर्मपरिपाकात्तेकरुणानिधिनोद्धृताः प्राप्यतीरतरुच्छायांवि
श्राम्यंतियथासुखं ३२ उपदेशमवाप्यैवमाचार्यात्तत्वदर्शिनः पंचकोशविवेकेनलभंतेनिर्वृतिंपरां अन्नंप्राणोमनोबुद्धिरानंदश्चेति
पंचते कोशास्तैरावृतःस्वात्माविस्मृत्यासंसृतिंव्रजेत् ३४ स्यात्पंचीकृतभूतोत्थोदेहःस्थूलोन्नसंज्ञकः लिंगेतुराजसैःप्राणैःप्राणःकर्मेंद्रि

पंच.१ श्रीगणेशायनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्यक्तत्वविवेकस्यक्रियतेपददीपिका ॥ १ ॥ नमःश्रीशंकरानंदगुरुपादांबुज
न्मने सविलासमहामोहग्राहग्रासैककर्मणे १ तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां सुखबोधायतत्वस्यविवेकोयंविधीयते २ शब्दस्पर्शा
१ द्योवेद्यावैचित्र्याज्जागरेपृथक् ततोविभक्तात्तत्संविदैकरूप्यान्नभिद्यते ३ तथास्वप्नेऽत्रवेद्यंतुनस्थिरंजागरेस्थिरं तद्भेदोतस्तयोःसंविदे
करूपानभिद्यते ४ सुप्तोत्थितस्यसौषुप्ततमोबोधोभवेत्स्मृतिः साचावबुद्धविषयाऽवबुद्धंतत्तदातमः ५ सबोधोविषयाद्भिन्नो
नबोधात्स्वप्नबोधवत् एवंस्थानत्रयेप्येकासंवित्तद्वद्दिनांतरे ६ मासाब्दयुगकल्पेषुगतागम्येष्वनेकधा नोदेतिनास्तमेत्येकासंविदेषास्व
यंप्रभा ७ इयमात्मापरानंदःपरप्रेमास्पदंयतः मानभूवंहिभूयासमितिप्रेमात्मनीक्ष्यते ८ तत्प्रेमात्मार्थमन्यत्रनैवमन्यार्थमात्मनि
अतस्तत्परमंतेनपरमानंदताऽऽत्मनः ९ इत्थंसच्चित्परानंदआत्मायुक्त्यातथाविधं परंब्रह्मतयोश्चैक्यंश्रुत्यंतेषूपदिश्यते १० अभानेनपरं
प्रेमभानेनविषयेस्पृहा अतोभानेप्यभातासौपरमानंदताऽऽत्मनः ११ अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् भानेप्यभानंभानस्यप्रतिबं
धेनयुज्यते १२ प्रतिबंधोस्तिभातीतिव्यवहारार्हवस्तुनि तंनिरस्यविरुद्धस्यतस्योत्पादनमुच्यते १३ तस्यहेतुःसमानाभिहारःपुत्रध्वनि
श्रुतौ इहानादिरविद्यैवव्यामोहैकनिबंधनं १४ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःसत्वगुणाप्रकृतिर्द्विविधाचसा १५ स १
त्वशुद्ध्यविशुद्धिभ्यांमायाविद्येचतेमते मायाबिंबोवशीकृत्यतांस्यात्सर्वज्ञईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा १६ य
थामुंजादिषीकैवमात्माबुध्यासमुद्धृतः शरीरत्रितयाद्धीरैः परंब्रह्मैवजायते साकारणशरीरंस्यात्प्राज्ञस्तत्राभिमानवान्
धी

पंच.प्र. यैः सह सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका कारणे सत्त्वमानंदमयो मोदादिवृत्तिभिः तत्तत्को
शैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ३६ अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते ३७ अभाने स्थूलदेहस्य
२ स्वप्ने यद्भानमात्मनः सोन्वयव्यतिरेकस्तत्तद्भानेन्यानवभासनं ३८ लिंगाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः व्यतिरेकस्तु तद्भाने लिंगस्या
भानमुच्यते तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः ते हि तत्र गुणावस्थाभेदमात्रात्पृथक्कृताः ४० सुषुप्त्यभाने भानं तु समा
धावात्मनोन्वयः व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनं यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः परं ब्रह्मैव जा
यते परापरात्मनोरेवं युक्त्या संभावितैकता तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते जगतो यदुपादानं मायामादाय तामसीं निमि
त्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा यदा मलिनसत्त्वां तां कामकर्मादिदूषितां आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते ४५ त्रितयीमपि तां
मुक्त्वा परस्परविरोधिनीं अखंडं सच्चिदानंदं महावाक्येन लक्ष्यते ४६ सोयमित्यादिवाक्येषु विरोधात्तदिदंतयोः त्यागेन भागयोरेक
आश्रयो लक्ष्यते यथा मायाविद्ये विहायैवमुपाधी परजीवयोः अखंडं सच्चिदानंदं परं ब्रह्मैव लक्ष्यते सविकल्पस्य लक्ष्यत्वे लक्ष्यस्या
स्यादवस्तुता निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च संभवं विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् आद्ये व्याहतिरन्यत्रानवस्थात्माश्र २
यादयः ४९ इदं गुणक्रियाजातिद्रव्यसंबंधवस्तुषु समं तेन स्वरूपस्य सर्वमेतदितीष्यतां ५० विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि

विकल्पितत्वलक्ष्यत्वसंबंधाद्यास्तु कल्पिताः ~~इतिवि~~ ५१ इत्थं वाक्यैस्तदर्थानुसंधानं श्रवणं भवेत् युक्त्या संभावितत्वानुसंधानं मननं
तु तत् ५२ ताभ्यां निर्विचिकित्सेर्थे चेतसः स्थापितस्य यत् एकतानत्वमेतद्धि निदिध्यासनमुच्यते इति ५३ ध्यातृध्याने परित्यज्य क्र
माद्ध्येयैकगोचरं निर्वातदीपवच्चित्तं समाधिरभिधीयते ५४ वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः स्मरणादनुमीयंते व्युत्थि
तस्य समुत्थितात् ५५ वृत्तीनामनुवृत्तिस्तु प्रयत्नात्प्रथमादपि अदृष्टासकृदभ्याससंस्कारसचिवाद्भवेत् ५६ यथा दीपो निवात
स्थो नेंगते सोपमा स्मृता अनादाविह संसारे संचिताः कर्मकोटयः अनेन विलयं यांति शुद्धो धर्मो विवर्धते (५७) क्षीयंते चास्य कर्मा
णि तस्मिन्दृष्टे परावरे ज्ञानाग्निः सर्वकर्माणि इति ५८ धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः वर्षत्येष यतो धर्मामृतधाराः स
हस्रशः ५९ अमुना वासनाजाले निःशेषं प्रविलापिते समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ६० वाक्यमप्रतिबद्धं सत्प्राक्प
रोक्षावभासिते करामलकवद्बोधमपरोक्षं प्रसूयते ६१ परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्नि
वत् ६२ अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं संसारकारणाज्ञानतमसश्चंडभास्करः ६३ इत्थं तत्त्वविवेकं विधाय विधिवन्म
नः समाधाय विगलितसंसृतिबंधः प्राप्नोति परं पदं नरो न चिरात् इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्या